# अथ शनैश्चरकृता श्री नृसिंहस्तुतिः

यत्पादपङ्कजरजः परमादरेण
संसेवितं सकलकल्मषराशिनाशम् ।
कल्याणकारणमशेषनिजानुगानां
स त्वं नृसिंह मयि धेहि कृपावलोकम् ॥१॥

सर्वत्रचञ्चलतया स्थितयाऽपि लक्ष्म्या
ब्रह्मादिवन्द्यपदया स्थिरया न्यसेवि ।
पादारविन्दयुगलं परमादरेण
स त्वं नृसिंह मयि धेहि कृपावलोकम्

यद्रूपमागमशिरःप्रतिपाद्यमाद्य-
माध्यात्मिकादिपरितापहरं विचिन्त्यम् ।
योगीश्वरैरपगताखिलदोषसङ्घैः
स त्वं नृसिंह मयि धेहि कृपावलोकम्

प्रह्लादभक्तवचसा हरिराविरास
स्तम्भे हिरण्यकशिपुं य उदारभावः ।
ऊर्वोर्निधाय तदुरो नखरैर्ददार
स त्वं नृसिंह मयि धेहि कृपावलोकम्

यो नैजभक्तमनलम्बुधिभूधरोग्र-
भङ्गप्रघातविषदन्तिसरीसृपेभ्यः ।
सर्वात्मकः परमकारुणिको ररक्ष
स त्वं नृसिंह मयि धेहि कृपावलोकम्

यन्निर्विकारपररूपविचिन्तनेन
योगीश्वरा विषयवीतसमस्तरागाः ।
विश्रान्तिमापुरविनाशवतीं पराख्यां
स त्वं नृसिंह मयि धेहि कृपावलोकम्

यद्रूपमुग्रमरिमर्दनभावशालि
सञ्चिन्तनेन सकलाघविनाशकारि ।
भूतज्वरग्रहसमुद्भवभीतिनाश
स त्वं नृसिंह मयि धेहि कृपावलोकम्

यस्योत्तमं यश उमापतिपद्मजन्म-
शक्रादिदैवतसभासु समस्तगीतम्
शक्त्यैवसर्वशमलप्रशमैकदक्षं
स त्वं नृसिंह मयि धेहि कृपावलोकम्

एवं श्रुत्वा स्तुतिं देवः शनिना कल्पितां हरिः ।
उवाच ब्रह्मवृन्दस्थं शनिं सद्भक्तवत्सलम्

नरसिंह उवाच-
प्रसन्नोऽहं शने तुभ्यं वरं वरय शोभनम् ।
यं वाञ्छसि तमेव त्वं सर्वलोकहितावहम्

शनिरुवाच-
नरसिंह त्वं मयि कृपां कुरु देव दयानिधे ।
मद्वासरस्तव प्रीतिकरस्स्याद्देवतापते
मत्कृतं त्वत्परं स्तोत्रं शृण्वन्ति च पठन्ति च ।
सर्वान्कामान्पूरय तां त्वं तेषां लोकभावन
तथैवास्तु शऽनेहं वै रक्षोभुवनमास्थितः ।
भक्तकामान्पूरयिष्ये त्वं ममैकं वचः शृणु
त्वत्कृतं मत्परं स्तोत्रं यः पठेच्छृणुयाच्च यः ।
द्वादशाष्टमजन्मस्थात् त्वद्भयं मास्तु तस्य वै
॥ इति शनैश्चरकृतनरसिंहस्तुतिः ॥